१

मो नमः ॥ अर्घ्यं ॥ यस्योदये महज्जगत्प्रबुध्यते प्रवर्त्तते चाखिलकर्मसिद्धये ॥ ब्रह्मेंद्र
नारायणरुद्रवंदितः सनः सदा यच्छतु मंगलं रविः ॥ आचमनीयं ॥ नमोस्तु सूर्याय
सहस्रभानवे सहस्रशाखान्वितसंभवात्मने ॥ सहस्रयोगोद्भवभावभागिने स
हस्रसंख्यायुगधारिणे नमः ॥ अथ पंचामृतभिंनभिंनमंत्र ॥ क्षीरोदतनयानंता
क्षीरोदतनयप्रिया ॥ क्षीरोदगंधसंयुक्तं पयस्नानाय गृह्यतां ॥ पयः ॥ जगदेतत्त
थासित्वं तथाभिजगतां हितं ॥ दधिनाम्नरूपेण दधिस्नानाय गृह्यतां ॥ दधि ॥ घृ ना
तकुंभसमायुक्तं घृतयोनिघृतप्रिया ॥ घृतभुक्घृतदानाश्री घृतस्नानाय गृह्य
तां ॥ घृतं ॥ मधुरूपेण वसंतस्त्वं त्वमेव जगतां मधु ॥ मधुसूदनसंप्रीत्या मधुस्ना
नाय गृह्यतां ॥ मधु ॥ जगदेतत्तथासित्वं शर्करागुडसंयुता ॥ अनंतशर्करापी
त्या स्नानार्थं प्रतिगृह्यतां ॥ इति पंचामृतस्नानं ॥ नमो नमः पापविनाशनाय वि
भात्मने सप्ततुरंगमाय ॥ सामर्ग्यजूनां च विधेविधाता भवाब्धिपोताय नमो

१

नमस्ते॥ उदये ब्रह्मरूपस्त्वं मध्याह्ने तु महेश्वरः॥ अस्तमाने स्वयं विष्णुस्त्रयीमूर्तिर्दि
वाकरः॥ हृत्पद्ममध्ये पुरुषं पुराणं नारायणं शाश्वतमादिदेवं॥ संचिंत्य सूर्यं च विरा
जमानं मत्तुं सयोगी जितवास्तथैव॥ हीनविभक्तिवर्णैश्च मात्राभिरक्षरैस्तथा॥ तत्स
र्वं क्षम्यतां देवप्रसादं कुरु किंकरं॥ नमः सूर्याय शांताय सगुणायादिहेतवे॥ निवे
दयामि चात्मानं त्वं गतिः परमेश्वर॥ शुद्धोदकस्नानं॥ स्वानंदबोधसंतुष्टः करुणा
दिगुणान्वितः॥ परिपूर्णः स्वयं वेद्युः परमानंदसंस्थितः॥ वस्त्रं॥ नास्त्यादित्यसमो दे
वो नास्त्यादित्यसमा गतिः॥ प्रत्यक्षो भगवान्विष्णुर्येन विश्वं प्रतिष्ठितं॥ यज्ञोपवीतं॥
अजाय लोकत्रयपावनाय भूतात्मने गोपतये वृषाय॥ सूर्याय सर्वप्रलयांतकाय
नमो महाकारुणिकोत्तमाय॥ चंदनं॥ नमो नमः सहस्रांशो आदित्याय नमो नमः॥
नमः पद्मप्रबोधाय नमस्ते द्वादशात्मने॥ अक्षतां॥ हरिद्रे रंचिते देवि हरिद्रेनार्चितः
सदा॥ हरिद्रा सर्वपापघ्नी मनः शांतिं प्रयच्छ मे॥ हरिद्रा॥ कुंकुमं कामिकं दिव्यं कामना

२

कामसंभवौ। कुंकुमेनार्चिता देवमतः शांतिं प्रयच्छमे॥ कुंकुमं॥ नानापरिमलद्र
व्यं समर्पयामि॥ नमो विश्वप्रबोधाय नमो भ्राजिष्णुविष्णवे॥ ज्योतिषे च नमस्तु
भ्यं ज्ञानार्काय नमो नमः॥ पुष्पं॥ करवीरै रिति॥ अथांगपूजा॥ आदित्याय नमः॥ पा
दौ पूजयामि॥ सवित्रे. जंघां. सूर्याय. जानुनी. खगाय. ऊरुं. पूष्णे. कटिं. गभस्त
ये. नाभिं. मार्तंडाय. वक्षस्थलं. जगत्चक्षुषे. शिरं. अथ नामावलिर्लिख्यते॥
सूर्याय. अर्यम्णे. भर्गाय. त्वष्ट्रे. पूष्णे. अर्काय. सवित्रे. रवये. गभस्तिपतये. अजाय. का
लाय. मृत्यवे. धात्रे. प्रभाकराय. पृथ्वीव्यापिने [illegible] वायवे. सोमाय. बृहस्पतये. शुक्रा
य. बुधाय. अंगारकाय. इंद्राय. विवस्वते. दीप्तांशवे. शुचये. शौरयाय. शनैश्चराय.
ब्रह्मणे. विष्णवे. रुद्राय. स्कंदाय. वैश्रवणाय. यमाय. वैद्युताय. जठराय. धनाय. तेज
सांपतये. धर्मध्वजाय. वेदकर्त्रे. वेदांगाय. वेदवाहनाय. कृताय. त्रेताद्वापाराय. क
लये. सर्वमलापघ्ने. कला. काष्ठा. मुहूर्ताय. क्षेपाय. क्षणाय. संवत्सरकराय. अश्वत्था

२

य· कालचक्राय· विभावसवे· पुरुषाय· शाश्वताय· योगिने· व्यक्ताव्यक्ताय· सनातनाय· कालाध्यक्षाय· प्रजाध्यक्षाय· विश्वकर्मणे· तमोनुदाय· वरुणाय· सागराय· अंशवे· जीमूताय· [illegible]· भूताश्रयाय· भूतपतये· सर्वलोकनमस्कृताय· स्रष्टे· संवर्तकाय· वन्हये· सर्वस्या· [illegible]याय· अनंताय· कपिलाय· भवाय· कामदाय· सर्वतोमुखाय· जयाय· विशालाय· वरदाय· सर्वधातुनिषेविताय· सुपर्णाय· भूतादये· शीघ्रकामाय· कामधीरणाय· धन्वंतरये· धूमकेतवे· आदिदेवाय· अदितिसुताय· द्वादशात्मने· अरविंदाक्षाय· पित्रे· मात्रे· पितामहाय· स्वर्गद्वाराय· प्रजाद्वाराय· मोक्षद्वाराय· त्रिविष्टपाय· देहकर्त्रे· प्रशांतात्मने· विश्वात्मने· विश्वतोमुखाय· चराचरात्मने· सूक्ष्माय· मैत्रेयाय· करुणान्विताय· इति अष्टोत्तरशतंनामसमाप्तं॥ आदित्यमंत्रयुक्तस्य आदित्यभुवनेश्वरं॥ आदित्यानोपरं देवमादित्यपरमेश्वरं॥ धूपं॥ विवस्वतेज्ञानभृतांतरात्मनेजगत्प्रदीपायजगद्धितैषणे॥ स्वयंभु

७ विहितमविहितं वा सर्वमेतत्क्षमस्व। जयजयकरुणाब्धे श्रीदिवाकर प्रभो॥७

३

वेदीप्ति सहस्रचक्षुषे स्करोत्तमायामिततेजसे नमः॥ दीपं॥ आदित्यः सविता विष्णुः खगः
पूष्णे गभस्तिमान्॥ सुवर्णस्फटिको भानुः स्फुरितो विश्वतापनः॥ नैवेद्यं॥ आचमनीयं॥
करोद्वर्तनं॥ पूगीफलं महद्दिव्यं नागवल्लीदलान्वितं॥ कर्पूरेलासमायुक्तं ताम्बूलं प्रति
गृह्यतां॥ ताम्बूलं॥ इदं फलमिति फलं॥ हिरण्यगर्भेति दक्षिणां॥ नीराजनदीपं॥ काय
जं कर्मजं वापि मदजं दर्पणं तथा॥ संपूज्य यत्कृतं पापं दहत्यांशुन संशयः॥ प्रदक्षि
णां॥ नमः सवित्रे पुष्पांजलिं॥ करचरणकृतं वा कायजं कर्मजं वा॥ श्रवणनयनजं वा मा न
नसं वापराधं॥ इति नमस्कारः॥ श्रियं प्राप्नोति विपुलां जझमाप्रोत्यनागमं॥ एवमा
राधितः सूर्यः सर्वान्कामान्विधास्यति॥ इति प्रार्थना॥ द्वादशार्घ्याणि दत्वा॥ मित्रा॰ रव
ये॰ सूर्याय॰ भानवे॰ खगाय॰ पूष्णे॰ हिरण्यगर्भाय॰ मरीचये न॰ आदित्या॰ सवित्रे॰ अर्काय॰
भास्कराय॰ इति रथसप्तमीपूजासमाप्तं॥ व्यतीपातनमस्ते स्तु सोमसूर्यसुतप्रभो॥ य
घदानादिकं किंचित्तदक्षय्यमिहोस्तु ते॥ गुंजामात्रमिदं स्वर्णं हेमविप्रकरान्वितं॥ तद्वा

नं मेरुणा तुल्यंत्तत्तोयं सागरोपमा॥ देवस्यत्वा०॥ ७ ॥ इत्युपनामकुंटे विनायकभट
इदं पुस्तकं॥ ७ ॥ संवत् १८ ४३ शाके १७०८ माघशुद्ध ५ बुद्ध॥ ७ ॥ ॥
रथसप्तमी उदयव्यापिनी ग्राह्या॥